## ॥ श्रीवरवरमुन्ययनमाला ॥

---

भवाब्धिसन्तारणदक्षिणानि श्रीसूक्तिरत्नान्यमृतोपमानि ।
संदत्तवान् कान्तवरोपयन्ता योगीश्वरो मे न जहाति चित्तम् ॥

सर्वोत्तरश्रीशठवैरिवाचां स्वादिष्ठमर्थं समयेऽनुगृह्णन् ।
रङ्गाधिराजादुपलब्धपद्यो रम्योपयन्ता मुनिरेव दैवम् ॥ २ ॥

अयननाम निवेश्य कृतामिमां वरमुनीन्द्रनुतिं हृदि कुर्वताम् ।
अयनमुत्तममच्युत आदरात् वितरतीह परत्र च पश्यत ॥ ३ ॥

---

एकस्मिन्नेव श्लोके युगचतुष्टयनामनिवेशन-
सनाथमिदं पद्यम् ॥

कृतं भूयः पापं प्रति किमिति चिन्ता भवति वः
कलत्रे ताते वा तनय उत बन्धुष्वपि पुनः ।

विरक्त्या मद्वाक्ये रुचिरिह भवेद्वा परमतः ।
कलिध्वान्तध्वंसी वरवरमुनिर्वो ध्रुवमवेत् ॥

---